# ईशावास्योपनिषद्



## पदानुक्रम-व्युत्पत्ति-ज्ञानकोशः





स्वामी दयानन्द आश्रम,
ऋषिकेश - 249137

*Scan for E- BOOKS*

ईशावास्योपनिषद्
पदानुक्रम-व्युत्पत्ति-ज्ञानकोशः

# ईशावास्योपनिषद्

## पदानुक्रम-व्युत्पत्ति-ज्ञानकोशः

हार्दिक धन्यवाद
**पूज्य स्वामी साक्षात्कृतानन्द सरस्वती**
**आचार्य राजेश्वर मिश्र**
**ब्रह्मचारी श्रीनिवासन**

जिनके सहयोग से यह कार्य सिद्ध हुआ

**श्रीमती वर्षा कजारिया**

© 2025 by the Author

All rights reserved. No part (either whole or part) may be reproduced, copied, scanned, stored in a retrieval system, recoeded or transmitted in form or by any means including but not limited to electronic and mechanical means, without the prior written permission of the author.

Website : www.paninisutra.com

Published by
Sri Gangadhareshwar Trust
Swami Dayananda Ashram
Risikesh, Uttarakhand - 249137

प्रथम संस्करण 2025
मूल्य - 200/-

**पुस्तक उपलब्धि स्थान -**

स्वामी दयानन्द आश्रम
मुनि की रेती,
ऋषिकेश 249137
+ 91 98430 43607

राजेश्वराचार्य जी
A-19, इन्दिरा एन्क्लेव
नेब सराय,
नई दिल्ली - 110068
+ 91 8178775405
sanskritam2005@gmail.com

ॐ

तत्सद्ब्रह्मणे नमः

# ईशावास्योपनिषद्

## शान्तिपाठः

ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते॥
ॐ शान्तिः शान्तिः शान्तिः।

## ॥ प्रेरणापत्र ॥

**जीवन में दो ही आनंद हैं - ''एक है वेदांत, दूसरा है संस्कृत।''**

ऐसा मेरे गुरुजी **स्वामी प्रबुद्धानन्द जी** ने कहा था। उनसे मैंने 1992 से वेदान्त का आनन्द पूर्वक निरन्तर अध्ययन किया। क्योंकि हमारे सभी शास्त्र संस्कृत में हैं, स्वामी जी हमें संस्कृत भी सिखाते थे, परन्तु मुझे संस्कृत का बिल्कुल भी ज्ञान नहीं था। तब मैंने सोचा कि जीवन में दूसरा आनन्द भी प्राप्त करना चाहिए। पढ़ाई की कोई उम्र नहीं होती। मैंने 55 वर्ष की आयु में स्वयं के सुख के लिए संस्कृत पढ़ने की ठान ली। समाचार पत्रों में विज्ञापन दिया **लघुसिद्धान्तकौमुदी** के ज्ञाता की आवश्यकता है।

प्रभु की असीम कृपा से **आचार्य राजेश्वर मिश्र जी** मिले जो संस्कृत के पूर्ण ज्ञाता हैं। उनसे मैंने 2007 से आनन्द पूर्वक सरलता से पाणिनि के प्रत्येक सूत्रों को समझा। भगवान् श्रीकृष्ण ने साक्षातस्वरूप से मुझे प्रेरणा दी कि मैं भगवद्गीता व उपनिषदों की धात्वर्थ-व्युत्पत्ति करूँ। तब उन सूत्रों का आधार लेकर संस्कृत प्रेमियों की सुविधा के लिए भगवद्गीता व उपनिषदों का प्रकाशन हुआ।

मेरी इष्टदेवी पहाड़ी माता की असीम अनुकम्पा से यह कार्य सिद्ध हुआ, जो आपके सामने उपस्थित है।

आशा है कि आप सब पूर्ण लाभान्वित होंगे।

धन्यवाद।

**श्रीमती वर्षा कजारिया**

वसंत पंचमी 2080

**अकायम्** (मन्त्रः 7) अकाय + सुँ, **अतोऽम्** (पा.सू. 7-1-24) इति सुँप्रत्ययस्य स्थाने अम्-अदेशः, **अमि पूर्वः** (पा.सू. 6-1-107) इति पूर्वरूपम् । अकाय इत्यत्र अविद्यमानम् कायम् यस्य तद् अकायम्, अविद्यमान + सुँ काय + सुँ इति अलौकिकविग्रहः, **अनेकमन्यपदार्थे** (पा.सू.2-2-24) इति बहुव्रीहिसमासः, **कृत्तद्धितसमासाश्च** (पा.सू. 1-2-46) इति अस्य प्रातिपदिकम्, **सुपो धातुप्रातिपदिकयोः** (पा.सू. 2-4-71) इति सुँप्रत्ययद्वयस्य लोपः, अविद्यमान + काय, वार्तिकम्-नञोऽस्त्यर्थानां वाच्यो वा चोत्तरपदलोपः (सि कौ वा स 1369, सि कौ सू स 830) **अनेकमन्यपदार्थे** (पा. सू. 2-2-24 इत्यत्र) इति विद्यमान इत्यस्य लोपः, ततः अकाय इति । काय इत्यत्र चि-धातोः (चिञ् चयने, स्वादिः, सि कौ धा सं 1251) **निवासचितिशरीरोपसमाधानेष्वादेश्च कः** (पा.सू. 3-3-41) इति घञ्-प्रत्ययः, चकारस्य कादेशश्च, **अचो ञ्णिति** (पा.सू. 7-2-115) इति वृद्धिः, **एचोऽयवायावः** (पा.सू. 6-1-78) इति आयादेशः, ततः काय इति। न.प्र.वि.ए.व. ।

**अग्ने** (मन्त्रः18) अग्नि + सुँ (सम्बुद्धिः), **ह्रस्वस्य गुणः** (पा.सू. 7-3-108) इति अङ्गस्य गुणः, **एङ्ह्रस्वात् सम्बुद्धेः** (पा.सू. 6-1-69) इति सम्बुद्धिसुप्रत्ययस्य लोपः । अग्नि इत्यत्र अग्-धातोः (अगि गतौ, भ्वादिः, सि कौ धा सं -146), **इदित्त्वात् इदितो नुम् धातोः** (पा.सू. 7-1-58) इति नुम्, (अन् ग्), **अङ्गेर्नलोपश्च** (उणा.सू. 4-50) इति निप्रत्ययः नलोपश्च । पुं.सम्बो.वि.ए.व. ।

**अत्येति** (मन्त्रः4) अति + एति, **इको यणचि** (पा.सू. 6-1-77) इति उपसर्गस्य इकारस्य यकारः । एति इत्यत्र इण्- धातोः(इण् गतौ, अदादिः, सि कौ धा सं 1045) लट्, लटः स्थाने तिप्, **कर्तरि शप्** (पा.सू. 3-1-68) इति शप्, **अदिप्रभृतिभ्यः शपः** (पा.सू. 2-4-72) इति शपः लुक्, **सार्वधातुकार्धधातुकयोः** (पा.सू. 7-3-84) इति धातोः इकारस्य एकारः गुणः । लट्. प्र.पु.ए.व. ।

**अथ** (मन्त्रः17) अर्थ्-धातोः (अर्थ उपाच्ञायाम्, चुरादिः, सि कौ धा सं-1905) **वार्तिकम् - अन्येभ्योऽपि दृश्यते** (मा.भा.वा.सं.-2072) **अन्येष्वपि दृश्यते** (पा.सू. 3-2-101 इत्यत्र) इति वार्तिकेन ड-प्रत्ययः, **पृषोदरादीनि यथोपदिष्टम्** (पा.सू. 6-3-109) रेफस्य लोपश्च । अव्ययम् ।

**अनिलम्** (मन्त्रः17) अनिलः अनिल + सुँ, **अतोऽम्** (पा.सू. 7-1-24) इति सुँप्रत्ययस्य स्थाने अम्-अदेशः,**अमि पूर्वः** (पा.सू. 6-1-107) इति पूर्वरूपम् । अनिल इत्यत्र अन्-धातोः (अनँ प्राणने, अदादिः परस्मैपदी सि कौ धा सं-1070 ) **सलिकल्यनिमहिभडिभण्डिशण्डिपिण्डितुण्डिकुकिभूभ्य इलच्** (उणा.सू. 1.54) इत्यनेन इलच्, इलचः **हलन्त्यम्** (पा.सू. 1-3-3) इति चकारस्य इत्संज्ञा, **तस्य लोपः** (पा.सू. 1-3-9) इति इत्संज्ञकस्य लोपः। न.प्र.वि.ए.व. ।

अनिलः (पुं.ए.वि.ब.व), अत्र तु अनिलम् (न.प्र.वि.ए.व) इति छान्दसम् ।



**अनुपश्यतः** (मन्त्रः7) अनुपश्यत् + ङस् = अनुपश्यतः अनु + पश्यत् = अनुपश्यत् । पश्यत् इत्यत्र दृश्-धातोः (दृशिर् प्रेक्षणे, भ्वादिः, सि कौ धा सं-988) लट्, दृश् + लट्, **लटः शतृशानचावप्रथमासमानाधिकरणे** (पा.सू. 3-2-124) इति लटः शतृ-प्रत्ययः, **कर्तरि शप्** (पा.सू. 3-1-68)इति धातोः शप्, **पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः** (पा.सू. 7-3-78) इति धातोः पश्यादेशः, पश्य + शप् + शतृ, **अतो गुणे** (पा. सू. 6-1-97) इति पश्य इत्यस्य अकारस्य, शपः अकारस्य च द्वयोः स्थाने एकः पररूपम् अकारादेशः, पश्य + अत्, पुनः **अतो गुणे** (पा. सू. 6-1-97) इति अनेन एतस्य पररूपस्य अकारस्य शतृ-प्रत्ययस्य अकारस्य च द्वयोः स्थाने एकः अकारः आदेशः, तेन पश्यत् इति। पुं.ष.वि.ए.व. ।

**अनुपश्यति** (मन्त्रः6) अनु + पश्यति = अनुपश्यति । पश्यति इत्यत्र दृश्-धातोः (दृशिर् प्रेक्षणे, भ्वादिः, सि कौ धा सं-988) लट्, दृश् + लट्, लटः तिप्, **कर्तरि शप्** (पा.सू. 3-1-68) इति धातोः शप्, **पाघ्राध्मास्थाम्नादाण्दृश्यर्त्ति - सर्त्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः** (पा.सू. 7-3-78) इति दृश्-धातोः पश्य-आदेशः, **अतो गुणे** (पा.सू.6-1-97) इति पश्य इत्यस्य अकारस्य, शपः अकारस्य च द्वयोः स्थाने एकः पररूपम् अकारः, ततः पश्यति इति । लट्. प्र.पु.ए.व. ।

**अनेजत्** (मन्त्रः4) न एजत् – अनेजत्, **नञ्** (पा.सू. 2-2-6) इति समासः, **नलोपो नञः** (पा.सू. 6-3-73) इति नस्य लोपः। **तस्मान्नुडचि** (पा.सू. 6-3-74) इति नुट् । एजत् इत्यत्र एज्-धातोः (एजृँ कम्पने, भ्वादिः परस्मैपदी सि कौ धा सं-234) लट्, **लटः शतृशानचावप्रथमासमानाधिकरणे** (पा.सू. 3-2-124) इति लटः शतृ-प्रत्ययः, **कर्तरि शप्** (पा.सू. 3-1-68) इति शप्, **अतो गुणे** (पा.सू. 6-1-97) इति पररूपम्, ततः एजत् इति । नपुं.प्र/द्वि.वि.ए.व. ।

**अन्तर्** (मन्त्रः5) अम्-धातोः (अम गतौ शब्दे सम्भक्तौ च, भ्वादिः, सि कौ धा सं-465) **अमेस्तुट् च** (उणा.सू.5.60) इत्यनेन अरन्-प्रत्ययः तुडागमश्च, **नश्चापदान्तस्य झलि** (पा.सू. 8-4-24)इति मकारस्य अनुस्वारः, **अनुस्वारस्य ययि परसवर्णः** (पा.सू. 8-4-58) इति अनुस्वारस्य परसवर्णः नकारादेशः। अव्ययम्।

अन्तः = अभ्यन्तरे इति शङ्करभाष्ये।

**अन्तिके** (मन्त्रः5) अन्तिक + ङि, **आद्गुणः** (पा.सू. 6-1-87) इति गुणः। अन्तिक इत्यत्र अन्तः अस्यास्ति इति अन्तिकः। **अत इनिठनौ** (पा.सू. 5-2-115) इति ठन्, अन्त + सुँ + ठन्, **कृत्तद्धितसमासाश्च** (पा.सू. 1-2-46) इति अस्य प्रातिपदिकसञ्ज्ञा, **सुपो धातुप्रातिपदिकयोः** (पा.सू. 2-4-71) इति सुँप्रत्ययस्य लुक्, **ठस्येकः** (पा.सू. 7-3-50) इति इकादेशः, अन्त + इक, **यचि भम्** (पा.सू. 1-4-18) इत्यनेन अङ्गस्य भसंज्ञा, **यस्येति च** (पा.सू. 6-4-148) इति भस्य अन्त्यस्य



अकारस्य लोपः, ततः अन्तिक इति । अन्त इत्यत्र अत्-धातोः (अत सातत्यगमने, भ्वादिः, सि कौ धा सं-38) इदित्वात्, **इदितो नुम् धातोः** (पा.सू. 7-1-58) इति नुम्, **नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः** (पा.सू. 3-1-134) इति अच्-प्रत्ययः अथवा **भावे** (पा.सू. 3-3-18) इति घञ्-प्रत्यये अपि अन्त इत्येव । नपुं.स.वि.ए.व. ।

अन्तिके = समीपे इति शङ्करभाष्ये।

**अन्धम्** (मन्त्रः9.12) अन्ध + अम्, **अमि पूर्वः** (पा.सू. 6-1-107) इति पूर्वरूपम्, अन्ध इत्यत्र अन्ध्-धातोः (अन्धँ दृष्ट्युपघाते चुरादिः उभयपदी सि कौ धा सं-1925) **नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः** (पा.सू. 3-1-134) इत्यनेन अच् , अचः **हलन्त्यम्** (पा.सू. 1-3-3) इति चकारस्य इत्संज्ञा,**तस्य लोपः** (पा.सू. 1-3-9) इति इत्संज्ञकस्य लोपः. ततः अन्ध इति । पुं.द्वि.वि.ब.व. ।

**अन्धेन** (मन्त्रः3) अन्ध + टा, **टाङसिङसाम् इनात्स्याः** (पा.सू. 7-1-12) इति इनादेशः, **आद्गुणः** (पा.सू. 6-1-87) इति गुणः । अन्ध इत्यत्र अन्ध्-धातोः (अन्धँ दृष्ट्युपघाते चुरादिः उभयपदी सि.कौ.धा.सं.-1925) **नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः** (पा.सू. 3-1-134) इत्यनेन अच् , अचः **हलन्त्यम्** (पा.सू. 1-3-3) इति चकारस्य इत्संज्ञा,**तस्य लोपः** (पा.सू. 1-3-9) इति इत्संज्ञकस्य लोपः. ततः अन्ध इति। पुं.तृ.वि.ए.व. ।

**अन्यत्** (मन्त्रः10. 13) अन्य सु, **अद्ड्डतरादिभ्यः पञ्चभ्यः** (पा.सू. 7-1-25) इति सु-स्थाने अद्ड्-आदेशः, अन्य + अद्, **टेः** (पा.सू. 6-4-143) इति भस्य टेः अकारस्य लोपः, अन्यद्,

**झलां जशोऽन्ते** (पा.सू. 8-2-39)इति जश्त्वम्, ततः अन्यद् इति । अन्य इत्यत्र अन्-धातोः (अन प्राणने, अदादिः, सि कौ धा सं-1070) **अघ्न्यादयश्च** (उणा.सू. 4-111) इति सूत्रेण इति यक्-प्रत्ययः, ततः अन्य इति। नपुं.प्र.वि.ए.व. ।

अन्यत् = पृथग् इति शङ्करभाष्ये।

**अन्यथा** (मन्त्रः2) अन्यशब्दात् प्रकारवचने **थाल्** (पा.सू. 5-3-23) इति थाल्-प्रत्ययः, अन्य + टा + थाल्, थालः लकारः **हलन्त्यम्** (पा.सू.1-3-3) इत्यनेन इत्, **तस्य लोपः** (पा.सू.1-3-9) इत्यनेन इतः लोपः, **कृत्तद्धितसमासाश्च** (पा.सू.1-2-46) इति प्रातिपदिकसंज्ञा, **सुपो धातुप्रातिपदिकयोः** (पा.सू. 2-4-71) इति टाप्रत्ययस्य लुक्, ततः अन्यथा इति । अन्य इत्यत्र अन्-धातोः (अन प्राणने, अदादिः, सि कौ धा सं-1070) **अघ्न्यादयश्च** (उणा.सू. 4-111) इति सूत्रेण इति यक्-प्रत्ययः, ततः अन्य इति। अव्ययम् ।

अन्यथा = प्रकारान्तरम् इति शङ्करभाष्ये ।

**अन्यान्** (मन्त्रः 4) अन्य + शस्, **प्रथमयोः पूर्वसवर्णः** (पा सू 6-1-102) इति दीर्घः, अन्यास्, **तस्माच्छसो नः पुंसि** (पा सू 6-1-103) इति शसः सकारस्य नकारः, ततः अन्यान् इति । अन्य इत्यत्र अन्-धातोः (अन प्राणने, अदादिः 2-65, सि कौ धा सं-1070) **अघ्न्यादयश्च** (उणा.सू. 4-111) इति सूत्रेण इति यक्-प्रत्ययः, ततः अन्य इति। पुं.द्वि.वि.ब.व. ।

अन्यान् = आत्मविलक्षणान् मनोवागिन्द्रियप्रभृतीन् इति शङ्करभाष्ये ।



**अपः** (मन्त्रः 4) अप् + शस् = अपः आप्-धातोः (आपॢ व्याप्तौ, स्वादिः सि.कौ सि कौ धा सं -1260) **आप्नोतेर्ह्रस्वश्च** (उणा.सू. 2-59) इति क्विप्-प्रत्ययः ह्रस्वः च, क्विपः सर्वलोपः - **हलन्त्यम्** (पा.सू. 1-3-3) इति पस्य **उपदेशेऽजनुनासिक इत्** (पा.सू. 1-3-2) इति इकारस्य, **लशक्वतद्धिते** (पा.सू. 1-3-8) इति ककारस्य च इत्संज्ञा, **तस्य लोपः** (पा.सू. 1-3-9) इति इत्संज्ञकानां लोपः, **वेरपृक्तस्य** (पा.सू. 6-1-67) इति वलोपः, ततः अप् इति प्रातिपदिकम् पकारान्तं स्त्रीलिङ्गं नित्यबहुवचनान्तः च। स्त्री.द्वि.वि.ब.व. ।

**अपापविद्धम्** (मन्त्रः 8) अपापविद्ध + सुँ, **अतोऽम्** (पा.सू. 7-1-24) इति सुँप्रत्ययस्य अम्-आदेशः, **अमि पूर्वः** (पा.सू. 6-1-107) इति पूर्वरूपम् । न पापविद्धम् अपापविद्धम्, **नञ्** (पा.सू. 2-2-6) इति समासः, **नलोपो नञः** (पा.सू. 6-3-73) इति नस्य लोपः । पापविद्धम् इत्यत्र पापेन विद्धम्, **कर्तृकरणे कृता बहुलम्** (पा.सू. 2-1-32) इति तृतीयतत्पुरुषसमासः । पाप इत्यत्र पा-धातोः (पा रक्षणे, अदादिः, सि कौ धा सं-1056) **पानीविषिभ्यः पः** (उणा.सू. 3-23) इति प प्रत्ययः, ततः पाप इति। विद्धम् इत्यत्र व्यध्-धातोः (व्यधँ ताडने दिवादिः परस्मैपदी सि कौ धा सं - 1181) **निष्ठा** (पा.सू. 3-2-102) इत्यनेन क्त प्रत्ययः, **ग्रहिज्यावयिव्याधिवष्टिविचति-वृश्चतिपृच्छतिभृज्जतीनां ङिति च** (पा.सू. 6-1-16) इत्यनेन व्यध् -धातोः यकारस्य सम्प्रसारणम्, ततः **सम्प्रसारणाच्च** (पा.सू. 6-1-108) इत्यनेन पूर्वरूपञ्च। **झषस्तथोर्धोऽधः** (पा.सू. 8-

2-40) इत्यनेन क्तः तकारस्य धकारः, **झलां जश् झशि** (पा.सू. 8-4-53) इत्यनेन धातोः धकारस्य दकारः, ततः विद्ध इति। नपुं.प्र.वि.ए.व.।

अपापविद्धं = धर्माधर्मादिपापवर्जितम् इति शङ्करभाष्ये।

**अपावृणु** (मन्त्रः 15) अप आ इति उपसर्गद्वयपूर्वकात् वृणु । अप + आ + वृणु, **अकः सवर्णे दीर्घः** (पा.सू. 6-1-101) इति दीर्घः वृणु इत्यत्र वृञ् धातोः (वृञ् वरणे, स्वादिः, सि कौ धा सं-1254) **लोट् च** (पा.सू. 3-3-162) इत्यनेन लोट्, धातोः **स्वादिभ्यः श्नुः** (पा.सू. 3-1-73) इत्यनेन श्नुः, लोटः सिप्, **सेर्ह्यपिच्च** (पा.सू. 3-4-87) इत्यनेन सिपः हिः, **उतश्च प्रत्ययादसंयोगपूर्वात्** (पा.सू. 6-4-106) इत्यनेन हिप्रत्ययस्य लुक्, वा । **ऋवर्णात् नस्य णत्वं वाच्यम्, रषाभ्यां नो णः समानपदे** (पा.सू. 8-4-1 इत्यत्र ) इति श्नु प्रत्ययस्य नकारस्य णकारः, ततः अपावृणु इति । लोट्.म.पु.ए.व. ।

अपावृणु = अपसारय इति शङ्करभाष्ये ।

**अपिहितम्** (मन्त्रः 15) अपिहित + सुँ, **अतोऽम्** (पा.सू. 7-1-24) इति सुँप्रत्ययस्य स्थाने अम्-अदेशः, **अमि पूर्वः** (पा.सू. 6-1-107) इति पूर्वरूपम् । अपिहित इत्यत्र अपि पूर्वकाद् धा धातोः (डुधाञ् धारणपोषणयोः जुहोत्यादिः सि कौ धा सं-1092) **निष्ठा** (पा.सू. 3-2-102) इत्यनेन क्त प्रत्ययः, **दधातेर्हिः** (पा.सू. 7-4-42) इत्यनेन धा-धातोः हिः इति, ततः अपिहित इति। नपुं.प्र.वि.ए.व.।

अपिहितम् = आच्छादितम् इति शङ्करभाष्ये।



**अभिगच्छन्ति** (मन्त्रः 3) अभिपूर्वकाद् गम्-धातोः (गम्लृ गतौ, भ्वादिः, सि.कौ.धा.सं. 1137) लट्, लटः झिः, गम् + झि, **कर्तरि शप्** (पा.सू. 3-1-68) इति शप्, अभिगम् + शप् + झि, **इषुगमियमां छः** (पा.सू. 7-3-77) इति छ्-आदेशः गछ् + शप् + झि, **छे च** (पा.सू. 6-1-73) इति तुक्, (गत् + छ्) + शप् + झि, **स्तोः श्चुना श्चुः** (पा.सू. 8-4-39) इति तकारस्य चकारः, (गच् + छ्) + शप् + झि, **झोऽन्तः** (पा.सू. 7-1-3) इति अन्तादेशः, अभिगच् + शप् + अन्ति, **अतो गुणे** (पा.सू. 6-1-97) इति पररूपम्, ततः अभिगच्छन्ति इति । लट्.प्र.पु.ब.व. ।

**अभूत्** (मन्त्रः 7) भू-धातोः (भू सत्तायां, भ्वादिः, सि कौ धा सं-01) लुङ्, लुङः तिप्, भू + तिप्, **च्लि लुङि** (पा.सू. 3-1-43) इति धातोः च्लिः, भू + च्लि + तिप्, **च्लेः सिच्** (पा.सू. 3-1-43) इति च्लिस्थाने सिच्, भू + सिच् + तिप् **गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु** (पा.सू. 2-4-77) इति सिचः लुक्, भू तिप्, **इतश्च** (पा.सू. 3-4-100) इति तिपः इलोपः, **लुङ्लङ्लृङ्क्ष्वडुदात्तः** (पा.सू. 6-4-71) इति धातोः अडागमश्च, ततः अभूत् इति । लुङ्.प्र.पु.ए.व. ।

**अमृतम्** (मन्त्रः 11) अविद्यमानं मृतं यस्मात् तत्, नोऽस्त्यर्थानां वाच्यो **वा चोत्तरपदलोपः ( वा.1361 )** इति समासः। मृत इत्यत्र मृ-धातोः (मृङ् प्राणत्यागे, तुदादिः, सि.कौ. - धा.सं. 1403) **निष्ठा** (पा.सू. 3-2-102) इति क्त-प्रत्ययः। नपुं. प्र.वि.ए.व.।

**अर्थान्** (मन्त्रः 8) अर्थ + शस्, **प्रथमयोः पूर्वसवर्णः** (पा सू 6-1-102) इति दीर्घः, अर्थास्, **तस्माच्छसो नः पुंसि** (पा सू 6-1-103) इति शसः सकारस्य नकारः, ततः अर्थान् इति । अर्थ इत्यत्र अर्थ्-धातोः (अर्थ उपयाच्ञायाम्, चुरादिः, सि कौ धा सं-1905) **अकर्तरि च कारके संज्ञायाम्** (पा.सू. 3-3-19) इति सूत्रेण घञ् प्रत्ययः। पुं.द्वि.वि.बहु.।
अर्थान् = कर्तव्यपदार्थान् इति शङ्करभाष्ये।

**अर्षत्** (मन्त्रः 4) जहृगु ऋष्-धातोः (ऋर्षीँ गतौ, तुदादिः, सि कौ धा सं-1287) बाहुलकाद् **वर्तमाने पृषद्बृहन्महज्जगच्छतृवच्च** (उणा. सू. 2-84 इति) औणादिक-अतिप्रत्ययः शतृवत् च, ऋष् + अत्, धातोः **कर्तरि शप्** (पा.सू. 3-1-68) इति शप्, **सार्वधातुकार्धधातुकयोः** (पा.सू. 7-3-84) इति गुणः, अर्षत् इति, ऋष्-धातोः (ऋर्षीँ गतौ, तुदादिः, सि कौ धा सं-1287) लट्, ऋष् + लट्, **लटः शतृशानचाव- प्रथमासमानाधिकरणे** (पा.सू. 3-2-124) इति लटः शतृ-प्रत्ययः, **तुदादिभ्यः शः** (पा.सू. 3-1-77) इति धातोः शप्रत्ययः, यद्यपि शस्य **सार्वधातुकमपित्** (पा.सू.1-2-4) इति ङित्, अतः **सार्वधातुकार्धधातुकयोः** (पा.सू. 7-3-84) इति प्राप्तःगुणः, **क्ङिति** (पा.सू.1-1-4) इति निषेधः, तथापि छान्दसः गुणः तु भवति, अतः अर्षत् इति। लङ्.प्र.पु.ए.व. ।
अर्षत् = गतम् इति शङ्करभाष्ये।



**अविद्यया** (मन्त्रः10,11) अविद्या + टा, **आङिचापः** (पा.सू. 7-3-105) इति अङ्गस्य आकरस्य एकारः, **एचोऽयवायावः** (पा.सू. 6-1-78) इति एकारस्य अयादेशः। अविद्या इत्यत्र न विद्या अविद्या तया इति **नञ्** (पा.सू. 2-2-6) इति समासः, **नलोपो नञः** (पा.सू. 6-3-73) इति नस्य लोपः । विद्या इत्यत्र विद्-धातोः (विद ज्ञाने, अदादिः सि कौ धा सं-1064) **संज्ञायां समजनिषदनिपतमनविदषुञ्शीङ्भृञिणः** (पा.सू. 3-3-99) इति क्यप्, **पुगन्तलघूपधस्य च** (पा.सू. 7-3-86) इति प्राप्तःगुणः, **क्ङिति च** (पा.सू. 1-1-5) इति तस्य निषेधः, **अजाद्यतष्टाप्** (पा.सू. 4-1-4) इति टाप्। स्त्री.तृ.वि.ए.व.।
अविद्यया = कर्मणा अग्निहोत्रादिना इति शङ्करभाष्ये।

**अविद्याम्** (मन्त्रः 9) अविद्या + अम्, **अमि पूर्वः** (पा.सू. 6-1-107) इति पूर्वरूपम्, अविद्या इत्यत्र न विद्या अविद्या, **नञ्** (पा.सू. 2-2-6) इति समासः, **नलोपो नञः** (पा.सू. 6-3-73) इति नस्य लोपः । विद्या इत्यत्र विद्-धातोः (विद ज्ञाने, अदादिः सि कौ धा सं-1064) **संज्ञायां समजनिषदनिपतमनविदषुञ्शीङ्भृञिणः** (पा.सू. 3-3-99) इति क्यप्, **पुगन्तलघूपधस्य च** (पा.सू. 7-3-86) इति प्राप्तःगुणः, **क्ङिति च** (पा.सू. 1-1-5) इति तस्य निषेधः, **अजाद्यतष्टाप्** (पा.सू. 4-1-4) इति टाप्। ततः विद्या इति । स्त्री.द्वि.वि.ए.व. ।
अविद्याम् = कर्म अग्निहोत्रादिलक्षणाम् इति शङ्करभाष्ये।

**Want to read more?**

Get full access by purchasing the complete book.

Buy Now
Secured by Razorpay

**Or contact us directly:**

**Rajeshwaracharya Ji**
A19, Indira Enclave, Neb Sarai, New Delhi – 110068
Mobile: +91 81787 75405

**Swami Dayanand Ashram**
Muni Ki Raiti, Rishikesh – 249137, Uttarakhand
Mobile: +91 98430 43607